तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

April 2026
Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:13 Issue: 01
April 2026, Price Rs.20/-
No. of pages-24



तिरुमलस्थ श्रीपद्मावतीसमेतस्वामिनः परिणयोत्सवः
25.04.2026 तः 27.05.2026 पर्यन्तम्



नागलापुरम्
**श्रीवेदवल्लीसमेत**
**श्रीवेदनारायणस्वामिनः**
ब्रह्मोत्सवः

३०-०४-२०२६ बृहस्पतिवासरः
प्रातः - .... रात्रौ - अङ्कुरार्पणम्
०१-०५-२०२६ भृगुवासरः
प्रातः - ध्वजारोहणम्, रात्रौ - महाशेषवाहनम्
०२-०५-२०२६ मन्दवासरः
प्रातः - लघुशेषवाहनम्, रात्रौ - हंसवाहनम्
०३-०५-२०२६ भानुवासरः
प्रातः - सिंहवाहनम्, रात्रौ - मौक्तिकमण्टपम्
०४-०५-२०२६ इन्दुवासरः
प्रातः - कल्पवृक्षवाहनम्, रात्रौ - सर्वभूपालवाहनम्
०५-०५-२०२६ भौम्यवासरः
प्रातः - आन्दोलिकायां मोहिन्यवतारः, रात्रौ - गरुडवाहनम्
०६-०५-२०२६ सौम्यवासरः
प्रातः - हनुमद्वाहनम्, सायं वसंतोत्सवः, रात्रौ - गजवाहनम्
०७-०५-२०२६ बृहस्पतिवासरः
प्रातः - सूर्यप्रभवाहनम्, रात्रौ - चन्द्रप्रभवाहनम्
०८-०५-२०२६ भृगुवासरः
प्रातः रथोत्सवः, रात्रौ - अश्ववाहनम्
०९-०५-२०२६, मन्दवासरः
प्रातः - चक्रस्नानम्, रात्रौ - ध्वजावरोहणम्

जम्मलमडुगु
**श्रीभूसमेत श्रीनारापुर**
**वेङ्कटेश्वरस्वामिनः**
**ब्रह्मोत्सवः**



३०-०४-२०२६ बृहस्पतिवासरः
प्रातः - .... रात्रौ - अङ्कुरार्पणम्
०१-०५-२०२६ भृगुवासरः
प्रातः - ध्वजारोहणम्, रात्रौ - महाशेषवाहनम्
०२-०५-२०२६ मन्दवासरः
प्रातः - लघुशेषवाहनम्, रात्रौ - हंसवाहनम्
०३-०५-२०२६ भानुवासरः
प्रातः - सिंहवाहनम्, रात्रौ - मौक्तिकमण्टपम्
०४-०५-२०२६ इन्दुवासरः
प्रातः - कल्पवृक्षवाहनम्, रात्रौ - सर्वभूपालवाहनम्
०५-०५-२०२६ भौम्यवासरः
प्रातः - आन्दोलिकायां मोहिन्यवतारः, रात्रौ - गरुडवाहनम्
०६-०५-२०२६ सौम्यवासरः
प्रातः - हनुमद्वाहनम्, सायं वसंतोत्सवः, रात्रौ - गजवाहनम्
०७-०५-२०२६ बृहस्पतिवासरः
प्रातः - सूर्यप्रभवाहनम्, रात्रौ - चन्द्रप्रभवाहनम्
०८-०५-२०२६ भृगुवासरः
प्रातः रथोत्सवः, रात्रौ - अश्ववाहनम्
०९-०५-२०२६, मन्दवासरः
प्रातः - चक्रस्नानम्, रात्रौ - ध्वजावरोहणम्



# गीतामृतम्

श्रीभगवानुवाच -

ज्यायसी चेत्कर्मणस्तेमता बुद्धिर्जनार्दन।
तत्किंकर्मणि घोरे मां नियोजयसि केशव।।

व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्।।

(भगवद्गीता ३.१,२.)

१. भावः - द्वितीयाध्याये ज्ञानिने योगमहिमानं उपदिश्य श्रीकृष्णः अद्य तृतीयाध्याये कर्मयोगोपदेशाय कारणं किमिति सन्दिग्धावस्थायां विद्यमानः अर्जुनः एवं पृच्छति।

२. भावः - कर्मज्ञानप्राधान्यविषये मिश्रितमिव सद्धिग्धवचनैः त्वं मम बुद्धिं भ्रामयसि। सन्देहास्पदा मम बुद्धिः सत्यनिर्णयं न जानाति। अतः ज्ञान कर्मयोगयोः मध्ये केन श्रेयः पाप्स्यामि तन्निर्णीय ब्रूहीत्यर्जुनस्य प्रश्नः।

# सङ्कीर्तनम्



मन्दर धर मधुसूदन
नन्दगोपनन्दन
नरसिंह गोविन्द नवनीतानन्द
हरि मुकुन्द नयनारविन्द
करिवरद गरुडगमनरूप
गुरुचाप यदुकुलदीप
भवहर भयहर परिपूर्णामृत

भुवनपालन सुरपालन
भुवनभूषण परपुरुष पुरातन
नव भोग करुणाभोग
पङ्कजासननुत भव्यनिर्मलपाद
पङ्कज परम परात्पर
वेङ्कटशैलनिवेशशु
भङ्कर क्षेमङ्कर।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ३९)

गुरुपदेशः प्रतिभेव तीक्ष्णा प्रतीक्ष्यते जातु न कालमार्तिं।

सम्पादकीयम्

# महात्मनां आगमनं लोककल्याणर्थमेव

महात्मानः निर्दिष्ट शुभकरकार्यसाधनार्थमेव व्यक्तिगततया सामूहिकतया वा इहलोके प्रविशन्ति। तेषामागमनेन तत्प्रदेशोऽपि पवित्रो भवति।चैत्रशुद्धचतुर्दशीतः वैशाखशुद्ध चतुर्दशी पर्यन्तं वर्तमाने अस्मिन् मासे २० तिथौ अवतारपुरुषस्य परशुरामस्य जयन्ती, २१ तिथौ जगत्प्रसिद्धस्य अद्वेतमतस्थापकस्य भगवदंशसम्भूतस्य श्रीशङ्कराचार्यस्य जयन्ती, २० तिथौ भृगमहर्षेः श्रीनिवासदीक्षितस्य च वर्षीतिरुनक्षत्रम् मकरतवल्ली समेतागस्त्येश्वर स्वामि ब्रह्मोत्सवः, १४ तिथौ तमिलसंवत्सरादिः, २२ तिथौ रामानुजाचार्यजयन्ती, २३ तिथौ श्रीरामजयन्ती, २७ तिथौ पद्मावती श्रीनिवास परिणयः, ३० तिथौ नृसिंह जयन्ती, मतृश्री तरिगोण्डवेंगमाम्बा जयन्ती इत्येवं शुभकरदिनानि वर्तन्ते इति महामङ्गलप्रदोऽयं मासः। धारणात् धर्मइत्याहुः।

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां।

आचारश्चैव साधूनां आत्मनः तृष्टिरेव च।।

सनातनहिन्दूधर्मः सत्यदयासद्गुणात्मनिग्रहादि सार्वजनीन नियमावकिबद्धः शाश्वतधर्मः। वेदकालादारभ्य धर्माचरणाश्रितं निरन्तररायं प्रवर्तमान जीवन विधानमेव सनातन धर्मः। सनातनं नाम परिणामरहितं अनाद्यं सर्वकालवर्तीधर्म एव। वेदोपनिनिन्द्भगवद्गीता रामायणभारत भागवतादि पवित्रग्रन्थाः धर्ममूलभूताः। मानव जीवित लक्ष्यं धर्मर्थकाममोक्षपुरुषार्थ साधनमेव। अहिंसाधर्मसत्यदानदयेन्द्रियनिग्रहात्मज्ञानो पार्जनादयः विश्वस्थिरत्वाय साधनमार्गाः। सभक्तिकपूजदिषु कायिकवाचिकमानसिकत्रिकरणशुद्धिः प्रकृति प्राणिषु समदृष्टिः, अष्टाङ्ग्योगावलम्वकत्वं सर्वेषामावश्यकम्। गीतोक्तरीत्या धर्ममार्गे निष्कामकर्मचरणं अरिषड्गर्गविजेतृत्वमत्यावश्यकम्। अस्मिन् मासे भगवान् दुष्टशिक्षणशिष्टरक्षणार्थं रामावतारं स्वीकृत्य ''रामो विग्रह वान् धर्मः'' इति वाक्यं सार्थकं कर्तुं आदर्शधर्ममूर्तित्वेन अवततार। शङ्कराचार्यः अद्वैत हिन्दूधर्म प्रचारकत्वेन, विशिष्टाद्वैत प्रचारकत्वेन अष्टाक्षरीसन्त्र प्रबोधकत्वेन रामानुजाचार्यः हिन्दूधर्मप्रबोधकर्तुत्वेन लोकोपयुक्ताः आसन्। भृगुः, परशुरामः एवं मोदहियांडान् श्रीनिवासदीक्षितः, अनन्ताल्वारु मधुरकविः, तरिगोण्डवेंगमाम्बादयः हैन्दवधर्णव्याप्तये भागस्वामिनः अभूवन्। एते इदं धर्मप्रचारवारसत्वं अस्माकं दत्वा स्वजन्म सार्थकं कृतवन्तः महात्मानः। एतान् महापुरुषान् स्मरन्तः वयं तन्मार्गे गच्छन्तः संसारसागरात् उद्धरेम।

''महापुरुषैः लोकोद्धरणमस्तु''

वेङ्कटाद्रिसमं स्थानं
ब्रह्माण्डे नास्ति किञ्चन ।
वेङ्कटेशसमो देवो
न भूतो न भविष्यति ॥

तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

स्वस्तिश्री चान्द्रमानश्रीपराभवनामसंवत्सर चैत्रशुद्धचतुर्दश्यां बुधवारादारभ्य-
वैशाखशुद्धचतुर्दश्यां-बृहस्पतिवारपर्यन्तम् - २०२६

## एप्रेल् - २०२६

सम्पुटिः-१३ सञ्चिका-०१

नृसिंहजयन्ती 06
- डा. पि.माधवी

परशुरामजयन्ती 07
- डा. वि.माधवरेड्डि

लीलापुरुषोत्तमः श्रीवेङ्कटनायकः 08
- डा. अजयकुमारनन्दः

भगवद्रामानुजजयन्ती 09
- डा. के.कोटेश्वरय्य

श्रीरामानुजचतुश्शलोकी 11
- डा. एन्.गुणवती


शङ्कराचार्यजयन्ती 15
- आचार्य जि.पद्मनाभम्

आसन्ने मरणे स्मरणानुगुणं पुनर्जन्म वा मोक्षप्राप्तिः 18
- डा. जि.चन्द्रशेखर्

तृप्तेरधिकं ऐश्वर्यं नास्ति (चित्रकथा) 20
- डा. के.सूर्यनारायणरेड्डि

द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः

मुखचित्रम् - उभयदेवीसमेत श्रीमलयप्पस्वामी, तिरुमल।
अन्तिमपुटचित्रम्:- श्रीपद्मावतीदेवी, तिरुचानूरु।





गौरवसम्पादकः:-
श्री मुद्दाड.रविचन्द्र, I.A.S.,
कार्यनिर्वहणाधिकारी,
ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा।। वि.जि.चोक्कलिङ्गम्, M.A., Ph.D., P.G.Dip in JMC

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,
सहायक-छायाचित्रग्राहकः,
ति.ति.दे.

### सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३
सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri_helpdesk@tirumala.org

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
— प्रधानसम्पादकः

घातयन्ति हि दूताः पण्डितमानिनः।




# नृसिंहजयन्ती

- डा. पि.माधवी
चरवाणी - ८५१९८०४७८४

३० तिथौ एप्रेल् २०२६ वैशाखशुक्लचतर्दशी नृसिंहजयन्तीति स्मृतिदर्पणम्, गदाधरपद्धतिः, पुरुषार्थ चिन्तमणिः, चतुर्वर्गचिन्तामणिः इत्येतेषु ग्रन्थेषु प्रोक्तम्। विष्णोः दशावतारेषु नृसिंहावतारः चतुर्थः। हिरण्यकशिपुः राक्षसानां राजा। अस्य धर्मपत्नी लीलावती। अस्याः गर्भवती काले एव हिरणयकशिपुः तपसे जगाम। अयमेव समुचित समयः इति देवेन्द्रः राक्षससंहारं प्रारेभे। लीलावतीगर्भस्थपिण्डमपि इन्द्रः हन्तुं प्रायतत। तदा नारदः अवरूद्ध्य तां स्वाश्रमं नीत्वा ररक्ष। गर्भरथशिशोः विष्णुभक्तिं बोधयामास। हिरण्यकशिपुः तपसा ब्रह्माणं सन्तोषयित्वा नरेभ्यः वा, मृगेभ्यः वा दिवा वा, रात्रौ वा प्राणिना, अप्राणिना वा मरणं माभूदिति वरमयाचत। ततः गृहमागत्य स्वभार्यारक्षकस्य नारदस्य कृतज्ञत्वामाविष्कृत्य शिशुं स्वगृहं नीत्वा प्रह्लादः इति नामकरणञ्चकार। वरगर्वेण देवताः बाधयति स्म। विष्णुद्वेष्यस्य पुत्रस्तु विष्णुभक्तः। पिता पुत्रविष्णुभक्तिं परिवर्तयितुं बहुप्रयत्नान् चकार। सर्वप्रयत्नेषु निफलेषु विष्णुः कुत्रवर्तते इति पुत्रमपृच्छत्। तदा प्रह्लादेन सर्वव्यापकः विष्णुरिति पितृताडितस्थम्भेऽपि वर्तते इति कथनात् विष्णुमूर्तिः स्तम्भादाविर्बभूव। ब्रह्मवराणामविरुद्धत्वेन अर्धमानवस्य अर्धमृगस्य रूपं धृत्वा सन्ध्यामसये प्राणविहीननखैः आविर्भूय राक्षसं विदार्य जघान।

**उग्रवीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।**
**नृसिंहं भीषणं भद्रं मृत्युमृत्युं नामम्यहम्॥**

इति मन्त्रजपेन नृसिंहजयन्ती दिनेपूजया शत्रुभयं नश्यति। स्कान्दपुराणमनुसृत्य - वैशाखशुक्लचतुर्दश्यामहं जातः इति अस्मिन्दिने एव व्रताचरणसुदिनमिति नृसिंहोक्तमिति स्कान्दपुराणे वर्तते। वैशाखशुक्लचतुर्दशीसोमवारे स्वाति नक्षत्रे प्रदोषकाले नृसिंहः अवततार। स्वातिनक्षत्रे शनिवारे सिद्धियोगे वणिजनामककरणे व्रताचरणं परमश्रेष्ठम्। एवद्विधयोगागमः बहुल्केशप्रदः। एतद्योगे रामजन्मदिने इदं व्रतमाचरणीयम्। मम व्रतमाचरितुं, सर्ववर्णानामधिकारोऽस्ति इति नृसिंहप्रोक्तत्वेन स्कान्दपुराणे वर्तते। अद्य वैष्णवाः एव अधिकतया व्रतमिदमाचरन्ति।

**व्रतविधिः -** वैशाखशुक्लचतुर्दश्यां व्रतमिदमाचरणीयम्। अस्मिन्दिने किमपि पापकार्यं नाचरणीयम्। गोमय शुद्धगृहे अष्टदलपद्मं संस्थाप्य कलशस्थापनं कर्तव्यम्। कलशोपरि तण्डुलपूर्णवेणुखण्डः स्थापनीयः। तत्र लक्ष्मीनारायणविग्रहाः निवेशनीयाः। शास्त्राचारमनुसृत्य व्रतमाचरणीयम्। तत्काललब्धपुष्पालङ्कारः कर्तव्यः। रात्रौ श्रीमन्नारायण कथाभिः पुराणकालक्षेपः कर्तव्यः। तदनन्तरोदये पुनः पूजा कर्तव्या। यथा शक्ति नृसिंहप्रतिमानां दानं, भोजनसन्तर्पणं कर्तव्यम्। दक्षिणदेशे नृसिंहजयन्तीपर्वसन्दर्भे दीपोत्सवाः प्रवर्तन्ते। नृसिंहविग्रहं आन्दोलिकायां संस्थाप्य वीथीभ्रामणोत्सवः कर्तव्यः। हम्पीनृसिंहदेवालयः महान् वर्तते। जयपुर संस्थाने खण्डेलास्थाने द्वादशहस्तदीर्घनृसिंहविग्रहः वर्तते। मधुरायोध्यानगरयोः नृसिंहलीलवोत्सवः प्रवर्तते। मालवदेशे नृसिंहजयन्युत्सवः वैभवोपेततया निर्वाह्यते इति व्रतोत्सव चन्द्रिकायां प्रोक्तम्।

विध्युक्तनृसिंहजयन्तीनिर्वहणात् सकलपापपरिहारः, नवग्रहबाधाविनाशः भवेत्। वैष्णवाः नृसिंहजयन्ती दिने सायं समये उपवासनियमं पालयन्ति। तद्रात्रौ पूजानन्तरं षड्रसोपेतभोजनं आगतेभ्यः सर्वेभ्यः समर्पयन्ति। पानकं नृसिंहस्वामिने प्रियनिवेदनं भवति।

**तत्प्रहरत्केशत्तज्वलत्पावकलोचन।**
**वज्राधिकनखस्पर्शदिव्यसिंह नमोऽस्तुते॥**



- डा. वि.माधवरेड्डि
चरवाणी - ९९४८५२३२५९

# परशुरामजयन्ती

परशुरामजयन्ती अस्मिन् वर्षे एप्रेल् २० तिथाविति ज्योतिष्कैः निर्दिष्टम् । चतुर्वर्गचिन्तामणौ वैशाखशुद्धद्वादशी जामदग्न्यव्रतमिति निर्दिष्टम्।

विष्णोः दशावतारेषु परशुरामः षष्ठः। वैशाखशुद्धद्वादश्यां रात्रौ प्रथमयामे पुनर्वसुनक्षत्रे ग्रहषट्कोच्चदशायामयं जातः। रेणुकाजमदग्न्योः पुत्रः अयं। माता क्षत्रियस्त्रीः। अनुलोमविवाहसम्बन्धात् जातोऽयम्। अयं बाल्ये एव स्वपितुः पितामहस्यभृगोराश्रमं जगाम। परशुरामस्य तेजसा असोढाः भृगुशिष्याः स्वनयनानि मुकुलितवन्तः आसन्। प्रपितामहः इमं हिमालयं गत्वा शिवमधिकृत्य तपः कर्तुमादिदेश। परशुरामः तथैव तपः कर्तुमारेभे। शिवः प्रत्यक्षीभूतः "बालस्त्वं, रौद्रास्त्रधरण शक्तिः अद्य तव नास्ति किञ्चित्कालपर्यन्तं तीर्थयात्राः कृत्वा पुनरागच्छत्यवोचत्। तीर्थयात्रानन्तरं परशुरामः पुनः तपः प्रारेभे। तदा इन्द्रादिदेवता राक्षसबाधापीडिताः शिवं शरणंययुः। तदा शिवः परशुराममाहूय परशुनामककुठारायुधं दत्वा देवतासाहाय्यार्थं प्रेषयामास। तदा प्रभृति परशुरामनाम सार्थकं बभूव। परशुरामः स्वर्गलोके राक्षसबाधां निवारयामास। पश्चात् माता पितरौ द्रष्टुं जगाम। कदाचिच्चित्रुको गन्धर्वराजपुत्रः स्वभार्यया सह जलविहारं करोति स्म। तादृशादृष्टं मम नास्तीति रेणुका चिन्तयन्ती आश्रममालस्यं जगाम। भर्ता आलस्य कारणं ज्ञात्वा कलङ्कितां तां मेने। ततः पिता जमदग्निः पुत्रान् तां हन्तुं आदिदेश। पुत्रत्रयं तत्कर्तुं नाङ्गीचकार। चतुर्थपुत्रः परशुरामः तत्कार्यं कर्तुमङ्गीकृत्य मातुः शिरःच्छेदं चकार। पिता संतृप्तः पुत्रं, वरं अभीष्टं प्राप्नुहि इत्यपृच्छत्। तदा परशुरामः मातरंपुन रुज्जीवयितुमयाचत। पिता रेणुकां पुनरुज्जीविताञ्चकार। परशुना कृतघनकार्यमिदमेव। कदाचित् पितरि आश्रमे अस्थिते दुःखिता माता होमधेनुं सुरभिनाम्नीं कार्तवीर्यः जहारेत्यवोचत्। परशुरामः सकुठारं गत्वा कार्तवीर्यंहत्वा सुरभिं पुनः गृहमानयामास। प्रतीकारकांक्षया कार्तवीयपुत्राः परशुरामे गृहे अस्थिते जमदग्निं जघ्नुः। माता पितृशवेपतिता एकविंशतिपर्यायं हृदि हस्तास्फलनं कुर्वन्ती रुदन्ती आसीत्। गृहमागतः परशुरामः तद्दृष्ट्वा सप्तविंशतिपर्यायं राजसु दण्डयात्रां कृत्वा राजवंशे गर्भस्थपिंडान्यपि जघान। हतराजरक्तेन पित्रेभ्यः तर्पणमपि चकार। तद्रक्तमेव शमन्तपञ्चकनाम्ना जलाशयो बभूव। सर्वराजभिः सकाशात् भूवशीकरणात् यज्ञमाचर्य तां सर्वां भूमिं कश्यपादिब्राह्मणेभ्यः दानं ददौ। पश्चात् महेन्द्रगिरिपर्वते तपः कर्तुमाश्रमं निर्ममे। ब्राह्मणाः दानरूपेण दत्तभूमौ तव निवासर्हता नास्तीत्यवोचन्। तदा परशुरामः समुद्रतीरं गत्वा स्रुवं समुद्रे पातयामास। तत् स्रुवं योजनद्वयदूरे अपतत्। तत्प्रदेशात् समुद्रः उपसंहृत्य आगतः। एवं स्रुवव्याप्तप्रदेशं परशुरामः स्वनिवासस्थलञ्चकार। तदेव मलबार्देशः इति वदन्ति। परशुराममधिकृत्य श्रीप्रतापरेड्डिमहोदयस्य स्वाभिप्रायाः -

परशुरामः महासंस्कर्ता, अनुलोमसञ्जातः। क्षत्रियस्त्री रेणुकायाः ब्राह्मणात् जमदग्नेः जातत्वात् अद्यतनाचारमनुसृत्य सङ्करजातीयः। प्राचीनकालमर्यादाः अनुसृत्य जामदग्न्युत्पत्तिः अनुलोमपद्धत्या सशास्त्रीयमेव। ब्राह्मणक्षत्रियाधिक्यविवादं परशुरामः स्वपरशुना परिष्कृतवानासीत्।

स्कान्दपुराणे सह्याद्रिखण्डे परशुराममधिकृत्य - अयं कश्यप ब्राह्मणेन दूरीकृतः सह्याद्रिपर्वते निवसन् तत्र ब्राह्मणाभावात् आटविकपर्वतजातिकण्ठेषु यज्ञोपवीतानि धारयित्वा तान् ब्राह्मणान् चकार। महत्संस्कारकार्यमिदम्। ब्राह्मणपक्षपात्यमेव ब्राह्मणवंशस्यैव सामूहिकशापं ददौ।

(अनुवर्तते १९)

# लीलापुरुषोत्तमः श्रीवेङ्कटनायकः

- डा. अजयकुमारनन्दः
चरवाणी - ९१८२३४१०५२

श्रीवेङ्कटेश्वरस्य विषये वेदोपनिषद्भगवद्गीतापुराण साहित्यादीषु ग्रन्थेष्वपि विस्तरेण विषयाः समुपलभ्यन्ते। तथैव वेङ्कटेश्वरस्य लीलाविषये नैकानि तथ्यानि ततद्ग्रन्थेष्वपि आसाध्यन्ते। यश्च भगवान् भवति सः साक्षादवतारी भवति। अतः अवतारत्वेन नानालीलां दर्शयितुमिदं भूपृष्ठं प्रत्यागतः। तद्भगवतः मुख्यरूपेण त्रिस्रः लीलाः प्रसिद्धास्सन्ति। बाल्यमध्यान्तःलीलाश्चेति। इतोऽपि गौणाः लीलाः अपि भवितुमर्हन्ति। यद्वास्तु अयं च श्रीवेङ्कटेशभगवान् योऽस्ति, तद्विषये ऋग्वेदे कश्चन मन्त्रः दृश्यते -

**आरायिकाणे विकटे गिरिं गच्छ सादत्वे।**
**शिरिंविटस्य सत्त्वभिः तेमीष्ट्वा सातयामसि।।**

(ऋवे.१.१५.१)

परमात्मन्युपनिषदि अपि उच्यते यत् -

**रयि ककुध्मान् विदधद्भिनष्टं रयि मद्विधानम्।**
**तस्मै ककुत्रे विकटायतमित्रे स्वाहा।।**

(पर.मा.उ.७-७)

**आग्नेयपुराणे** - वसिष्ठनारदसंवादे श्रीवेङ्कटेश्वरदिव्य - कवचम्, वेङ्कटाचलमाहात्म्यं च वर्तते।

भविष्योत्तरपुराणे ५१ अध्याये श्रीवेङ्कटेश्वरस्तुतिः वर्तते। तद्वदत्र पद्मावत्या सह श्रीवेङ्कटेश्वरस्य विवाहोऽपि वर्णितः अस्ति। कुबेरसदृशः श्रीवेङ्कटेश्वरः धनपतिरस्ति। तदप्यत्र उल्लिखितं दृश्यते। यथा -

**जप सर्वगुहावस लोकरक्षामणेः हरेः।**
**भक्तार्तपालनहरः प्रणतार्तिहरप्रभो!।।**

(भविष्य.पु.५१)

आदित्यपुराणे वेङ्कटाचलमाहात्म्यम्, श्रीनिवासस्तुतिः, श्रीनिवास -साक्षात्कारादयः विषयाः वर्णितास्सन्ति। ब्रह्माण्डपुराणे अपि श्रीनिवासविलासः, श्रीवेङ्कटेश्वरसहस्रनामस्तोत्रमिति, विषयाः वर्तते।

मार्कण्डेयपुराणे अगस्त्येन वेङ्कटाचलमाहात्म्यं वर्णितम्। सुब्रह्मण्यकृता श्रीवेङ्कटेश्वरस्तुतिः अत्रास्ति।

ब्रह्मपुराणे स्वामिपुष्करिण्याः वर्णना विद्यते। श्रीनिवासस्य स्वामिपुष्करिणीं प्रत्यागमनविषयोऽपि वर्णितः अस्ति। स्कन्दपुराणस्य ब्रह्मोत्तरखण्डे श्रीवेङ्कटेश्वरस्य अष्टोत्तरशतनामावली वर्तते।

पद्मपुराणस्य क्षेत्रकाण्डे केवलं वेङ्कटेश्वरस्य नाम अभिहितम्। वैष्णवखण्डे विस्तरेण विषयः चर्चितः विद्यते। तद्वदन्यपुराणेष्वपि यथा - वराह गरुड ब्रह्माण्ड- वामन हरिवंशादीषु पुराणेषु श्रीवेङ्कटेश्वरस्य विस्तरेण वर्णितत्वादयं पुराणपुरुषोत्तमः, वेदेक्तत्वाद्वेदपुरुषोत्तमः, उपनिषदुक्तत्वादुपनिषत्पुरुषोत्तमः इति चकथ्यते।

विश्वगुणादर्शचम्पूग्रन्थेऽपि श्रीवेङ्कटेश्वरस्य वेङ्कटाचलक्षेत्रस्यापि वर्णना कृता अस्ति। तस्मादयं साहित्यपुरुषोत्तमः श्रीवेङ्कटनायकः भवति।



वेद-उपनिषत्-पुराण-धर्मशास्त्र-साहित्य-लोक-सर्वशास्त्रमय-सर्वज्ञानमय-सर्वदेशमय-सर्वव्यापककारणादयं पुरुषोत्तमः पदवाच्यः भवति। अस्मादुच्यते भगवद्गीतायामतोऽस्मि लोके वेदे च प्रथितःपुरुषोत्तमः। एतैः सर्वैः नायकगुणैः विभूषितत्वादयं श्रीवेङ्कटेशनायक, लीलापुरुषोत्तम - नायकत्वमावहति, इत्यत्र नास्ति काचिद्विचिकित्सा।



# भगवद्रामानुजजयन्ती

- डा.के.कोटेश्वरय्य, चरवाणी - ९९८५१२३२६२

भूमिपेरट्टियार् - आसूरिकेशवपेरुमाळ् दम्पत्योः श्रीपेरुम्बूदूरुपट्टणे क्रीश १०१७ वर्षे रामानुजः अजायत। बालमेधावी अयं कञ्चिनगरे अद्वैतसिद्धान्तपण्डितयादवप्रकशस्य शिष्यः बभूव। अस्य शिष्याणां रामनुजः कनिष्ठमातुः पुत्रः गोविन्दोऽपि वर्तते। अद्वैतपरगुरुपाठे रामानुजः व्यतिरिक्तः गुरोराग्रहात् तद्गुरुं तत्याज। यादवप्रकाशः रामानुजप्रतिभां ज्ञात्वा अद्वैतसिद्धान्त हानिकरः इति शिष्यानुवाच।

यादवप्रकाशशष्यिाः काशीयात्राव्याजेन मार्गमध्ये रामानुजं हन्तुं निश्चितवन्तः। परन्तु कनिष्ठमातुः पुत्रः सर्वां वञ्चनां, द्रोहबुद्धिं ज्ञात्वा अपायात् रामानुजं ररक्ष। रामानुजः अर्धरात्रौ दुर्गमारण्यमतीत्य कञ्चिचनगरं प्राप। वेषान्तरे कृष्णसाहाय्यादेव अपायाद्रक्षणं बभूवेति वदन्ति। रामानुजः विषयमेनं केवलं मातुः मात्रं विज्ञाप्य गोप्यरक्षणाय मातरं प्रार्थितवान्। श्रीरङ्गे आलवन्दारुः निवसतिस्म। स रामानुजप्रतिभां ज्ञात्वा स्वसकाशमागन्तुं रामानुजाय वार्तां प्रेषयामास। रामानुजस्य श्रीरङ्गप्राप्तिपूर्वमेव आलवन्दारुः अम्रियत। रामानुजः आलवन्दरारु पार्थिवदेहं दृष्ट्वा तत्र तस्य दक्षिणहस्ताङ्गुलीत्रयंमुकुलित मपश्यत्। रामानुजः अन्तर्दुष्ट्या व्यास पराशरयोः तस्मिन् समये समुचितस्मारकचिह्नसम्पादनम् नम्मल्वारुविषये भक्तिप्रपत्तिवर्धनम्, ब्रह्म सूत्राणां विशिष्टाद्वैतपरतया व्याख्यान लेखनमिति त्रयं मुकुलिताङ्गल्यः सूचयन्तीति रामानुजः जग्राह। आलवन्दारुस्वामिनः मरणानन्तरं तत्स्थानमलङ्कर्तुं रामानुजः एव समर्थः इति शिष्यः पेरियनम्बिः ज्ञात्वा रामानुजाह्वानाय कञ्चिं प्रस्थितः। रामानुजोऽपि पेरियनम्बिसकाशात् विशिष्टाद्वैतरहस्य ज्ञानाय कञ्चिं प्रस्थितः। द्वावपिमार्गे मधुरान्तकसमीपे कोदण्डरामस्वाम्यालये मिलितवन्तौ। रामानुजः पेरियनम्बिनं गुरुभावनया भार्यया सह कञ्चिनगरं आगन्तुं आह्वयामास। द्वावपि कञ्चिनगरमागतौ। पेरियनम्बी रामानुजाय वेदसारं ब्रह्मसूत्रानुसारं विशिष्टाद्वैतपरतया व्याख्यानं कृत्वा उपदिदेश। कदाचित् रामानुजभार्यायाः पेरियनम्बिभार्यायाः तदा उभयोर्मध्ये कलहागमनकारणात् रामानुजः भार्यां मातृगृहं प्रेषयित्वा सन्न्यासं स्वीकृत्य कञ्चिनगरे एव ''यतिराज'' इति प्रसिद्धिमवाप। कञ्चिनगरे एव मठं संस्थाप्य विशेषकीर्तिमार्जिवान्। तस्य जामाता दाशरथिः प्रथमशिष्यः बभूव। महाधनीकूरेशः सर्वसम्पत् दानरूपेण दत्वा द्वितीय शिष्यः अभवत्। रामानुजस्य प्रथमगुरुः अद्वैताचार्यः यावदवप्रकाशः तृतीयशिष्यो भूत्वा सगुणब्रह्मणि उपदेशमवाप। रामानुजः देवालयशिखरात् सर्वेभ्यः मन्त्रोपदेशं चकार। गुरौ कोपोद्रिक्तेऽपि गुरुकोपात् मयि नरके







प्राप्तेऽपि सहस्रजनाः मन्त्रं स्मरिष्यिन्तीति मोक्षं प्राप्स्यन्तीति गुरोः समाधानं दत्वा सर्वमानवसौभ्रातृत्वं प्रकटीचकार। वैष्णवसिद्धान्तन् अध्ययनं कृत्वा स्वयं ब्रह्मसूत्रग्रन्थानां विशिष्टद्वैतपरतया व्याख्यां विरच्य तत्सिद्धान्तंविशेषप्रचारं चकार। तद्भाष्यमेव श्रीभाष्यमिति वदन्ति। श्रीरङ्गनाथालयस्य सर्वाधिकारी भूत्वा तं वैष्णवकेन्द्रञ्चकार। आलयनिर्वहणं पूजाविधानञ्च क्रमबद्धञ्चकार। तिरुमलक्षेत्रं संदृश्य तत्रापि पूजाविधानं क्रमबद्धी चकार। अद्यापि तदेव विधानमनुस्रियते। पश्चात् श्रीमलवाणमहर्षिणा स्वशिष्यप्रतिवादभयङ्करावन् स्वामिना की.१३२१-१४५४ वर्षे श्रीवेङ्कटेश्वरसुप्रभातं रचितश्चकार। तदेव तिरुमलक्षेत्रे नित्य सुप्रभातसेवायां गीयते। पश्चात् रामानुजः उत्तरदेशदिग्विजययात्रां चकार। यज्ञमूर्तिनामकं अद्वैतपण्डितं पराजित्य स्वशिष्यञ्चकार। क्रमशः श्रीभाष्यं प्रसिद्धिमवाप। तेषु दिनेषु दक्षिणदेशपालकाः चोलाः शैवा आसन्। चोलराजाग्रहात् श्रीरामानुजः श्रीरङ्गं परित्यज्य मैसूरुनगरं जागम। तत्र मेल्कोटिप्रदेशे श्रीकृष्णदेवालयं निर्माय अस्पृश्यानामपि समतादृष्ट्या प्रवेशं कल्पयित्वा मानवतादृकूपथमाविश्चकार। पश्चात् श्रीरङ्गं प्रतिनिवृत्तः की.श.११३७ वर्षे १३० वर्षपर्यन्तं जीवित्वा पूर्णायुष्कः विष्णुसायुज्यमवाप। श्रीरामानुजस्य **विशिष्टद्वैतसिद्धान्तः -** विश्वं मिथ्या न भवति, परमात्मा, जीवात्मा भिन्नावेव। सकलकल्याणगुणसमन्वितः, दिव्यमङ्गलस्वरूपः, श्रीमन्नारायणः एव सृष्टिकर्ता, सर्वनियामकः, तस्मिन् भक्तिमात्रं मोक्षसाधनमिति सर्वाचरणयोग्यं रामानुजमतम्। विशिष्टाद्वैतस्य प्रस्थानत्रयेण साकं, तमिलद्राविड वेदः, सुदर्शनभट्टर् वेदान्तदेशिकादीनां रचनाः अपि शिरोधार्याः भवन्ति। प्रस्थानत्रये जीवात्मापरमात्मनोः भेदाभेदावाश्रित्य अद्वैतविशिष्टाद्वैतनामान्यागतानि। स्वसंकल्पमात्रेण परमात्मा मूलप्रकृतिं विनियुज्य मायामुपकरणीकृत्वा विश्वमिदं सृजति। तद्वयं प्रत्यक्षं पश्यामः। अतः प्रपञ्चः मिथ्या न भवति। श्रीमन्नारायणः अधिपतिर्नियामाकः। विश्वस्थ-चेताननाचेतनवस्तूनि तस्य शरीरमेव। जीवात्मपरमात्मनोः ऐक्यं न सम्भवति। कल्याणानुसारप्राकृतशरीरमेव संसारः। भगवन्तमधिकृत्य निश्चलनिरन्तरभक्तिप्रपत्तिभ्यां वैकुण्ठवासश्रीमन्नारायण



सन्निधौ ब्रह्मानुभव प्राप्तिरेव मोक्षः इति विषिष्टाद्वैतं श्रुतिसमन्विततया अर्थं विवृणोति। परमात्मा, अचेतनं विश्वं, चेतनं जीवः इति त्रीणि तत्त्वनि वर्तन्ते इति प्रतिपादयति। तत्र चेतनाचेतने द्वे प्रलयकाले परमात्मनि मिलिते भवतः। चेतनाचेतने परमात्मनः शरीर मेव। विशिष्टत्वात् सिद्धान्तमिदं विशिष्टाद्वैतमिति कथ्यते। जगत् जीवाश्च दैवशरीरमेव। देहस्य देहत्वेन तस्य स्थितिः, यतः देव एव तस्य आत्मा यजमानश्च भवति। ब्रह्मणः भिन्नत्वेन तयोरस्तिकरत्वं नास्ति। जीवात्मा जडजगत् ईश्वरभिन्ने एव। ईश्वराराधनं ईश्वरसेवार्थमेव। अन्यप्रयोजनं तयोर्नास्ति। अतः रामानुजसिद्धान्ते अद्वैतमपि विशेषसहितं दृश्यते। एकमेव परमात्मा अनेकत्वमङ्गीकरोति, तत् जीवजगद्भिः संयुक्तः वर्तते। अत एव तत् विशिष्टाद्वैतमिति भारतीयतत्त्वशास्त्रे सर्वेपल्लिराधाकृष्णेनापि प्रोक्तम्। विशिष्टाद्वैत सिद्धान्तसारस्वतं द्राविडभाषायां वर्तते। अस्मिन् सिद्धान्ते बोधायनवृत्तेः अधिकप्राधान्यं दृश्यते। बोधायनः ब्रह्मसूत्राणां वृत्तिं व्यरचीत्। विशिष्टाद्वैतबीजाः तत्र वर्तन्ते। रामानुजानुसृतकूरेशः तां वृत्तिमध्ययनं कृत्वा कण्ठस्थीचकार। तत्साहाय्येन ब्रह्मसूत्राणां भाष्यं विरचितम्। विशिष्टाद्वैतसिद्धान्तसारस्वते मकुटायमानमिदम्। अस्य सुदर्शनभट्टः श्रुतप्रणालिकाटीकां व्यरचीत्। आल्वारुणां उपदेशसारस्वतं नाथमुनिः क्रमपद्धतौ चतुस्सहस्त्रपाशुरेषु क्रोडीचकार। तदेव द्राविडवेदत्वेन प्रसिद्धिं प्राप्य पारायणे वर्तते। नम्मल्वारु तिरुवायिमेलि, आण्डाल् तिरुप्पावै प्रसिद्धाः। वेदान्तदेशिकः रामानुजः श्रीभाष्यस्य गीताभाष्यस्य च तात्पर्यादिरचनाश्चकार। एतेषां दयाशतकं, पादुकासहस्त्रं श्रीपिल्लैलोकाचार्य वचनभूषणमेव अपारसारस्वतं तमिले संस्कृते विशिष्टाद्वैतसिद्धान्तमधिकृत्य विरचितं सन्दृश्यते। रामानुजस्तुतिग्रन्थाः रामानुज दर्शनाधारगन्थाः बहवः वर्तन्ते। रामानुजः शेषांशसम्भूतः। अयं विशिष्टद्वैतप्रचारार्थं ७४ शिष्यान् नियुयोज। अयं शताधिकषड्विंशवर्षपर्यन्तं यतिराजत्वेन जीवनं यापयित्वा जगत्प्रसिद्धिं प्राप्य परमपदमवाप।

# श्रीरामानुजचतुश्शलोकी

तेलुगुमूलम् - डा. इ.ए.सिङ्गराचार्यः
संस्कृतानुवादः - डा. एन्.गुणवती



## अनन्ताल्वान् महाशयेन अनुगृहीत श्रीरामानुजचतुश्शलोकी



अनन्ताल्वान् महाशयः श्रीस्वामिरामानुजे अपारभक्तियुतः अयं कर्णाटकराष्ट्रे माण्ड्यमण्डले सिरिपुत्तूरु( किरङ्गनूरु - मेल्कोटे समीपे) नामकसुन्दरग्रामे चित्तामासे चित्तानक्षत्रे जातः अस्य निजनाम अनन्तार्यः इति।



अखिलात्मगुणावासमज्ञानतिमिरावहम्।
अश्रितानां सुशरणं वन्दे अनन्तार्यदेशिकम्।।
श्रीमद्रामानुजाचार्यश्रीपदाम्भोरहद्वयम्।
सदुत्तमाङ्गसन्धार्यमनन्तार्यमहंभजे।।
चक्रेगोदाचतुश्शलोकीं यो वेदार्थप्रगर्भिताम्।
श्रीवेङ्कटेशसद्भक्तं तमनन्तगुरुं भजे।।

वेदार्थपूरितगोदाचतुश्शलोकीनाम्नीं स्तुतिं प्रदत्तं गुरुं तिरुमल अनन्तान्पिळ्ळै (अनन्ताल्वान्) महाशयं सम्पूज्य प्रार्थये।



1. श्लोकः श्रीरङ्गम् -

अनिशं भजतामनन्यभाजां
चरणाम्भोरुहमादरेण पुंसां।
वितरन् नियतं विभूतिमिष्टां
जय! रामानुज! रङ्गधाम्नि नित्यम्।।

भावः - हे रामानुज! त्वदीयपादावाधारी कृत्य अनन्यशरण्य भक्तेभ्यः तैः वांच्छितकैङ्कर्यं सम्पदं ददानः त्वं श्रीरङ्ग महादेवालये विजयश्रीत्वेन प्रकाशमानः भव!

विशेषः - अनन्ताल्वान् महाशयस्य इष्टमाचार्यकैङ्कर्यं इहपरलोकमोक्षप्रदं अस्मादेव रामानुजाः प्रसादितवन्तः।



2. श्लोकः तिरुमल -

भुविनोविमतान् त्वदीयसूक्तिः
कुलिशीभूय कुदृष्टिभिस्समेतान्।
शकलीकुरुते विपक्षधीड्या
जय! रामानुज! शेषशैलशृङ्गे।।

भावः - श्रीवेङ्कटेश्वरस्वामिने शंखचक्रसमर्पक। स्वामिनां श्रीसूक्तयः वज्रायुधमिव कुदृष्टियुतान् वेदविरुद्धान् शत्रून् भस्मीकुर्वन्ति। वेदार्थसंग्रहः इत्ययं ग्रन्थः रामानुजेन विरचितः आदिमग्रन्थः इति वदन्ति एते तिरुवेङ्कटगिरिशिखरे बहुवर्षपर्यन्तं विजयलक्ष्म्या प्रकाशन्तु।

विशेषः - इतर सम्प्रदायेषुगीतां, उपविषदः, ब्रह्मसूत्राणि प्रस्थानत्रयमिति वदामः। अस्माकं सम्प्रदायः एकः एव। सर्वेसम्प्रदायाः करुणाभावयुताः एव मदगजः स्वकरेण्वर्थं कीचकस्थमकरन्दं प्रदाता इव तिरुवेङ्कटम्। अस्मद्रामानुजाः मुनिश्रेष्ठः इव अनन्ताल्वारोः वेदार्थान् समन्वयं कृत्वा सर्वं सामञ्जस्यं कृतवन्तः।

3. श्लोकः - हस्तिगिरिः (काञ्चीपुरम्)

श्रुतिषु स्मृतिषु प्रमाणतत्वं
कृपयालोक्य विशुद्धया हि बुद्धया।
आकृथास्स्वत एव भाष्यरत्नम्
जय! रामानुज! हस्तिधाम्नि नित्यम्।।

भावः - हे श्रीभाष्यकार! यतिराज! निर्हेतुककृपया श्रुतिस्मृतिस्थप्रमाणानां सत्यं दोषरहितबुद्धया निष्पक्षपाततया विचार्य श्रीभाष्यं अनुगृहीतवन्तः। एतादृशाः भवन्तः श्रीहस्तिगिरौ (काञ्चीपुरे विजयेन नित्यश्रीत्वेन प्रकाशन्तु।

विशेषः - वरदराजपेरुमाल् निलयस्य श्रीभाष्यस्य च महान् सम्बन्धः वर्तते। किरातदम्पतीत्वेन आगत्य रामानुजरक्षकः वरदराजस्वामिनः षण्मतस्थापनानुग्रहः अत्रैव।

4. श्लोकः यादवाद्रिः (मेल्कोटै)

जय! मायामतान्धकारभानो।
जय! बाह्यप्रमुखाटवीकृशानो!।
जय! संश्रित सिन्धुशीतभानो।
जय! रामानुज! यादवाद्रिशृङ्गे।।

भावः - आदिशेषावतारलक्ष्मणमुने! मायावादमतान्धकारस्य भगवत्सूर्यतुल्य। बाह्यकुदृष्टिनामकभीकरमहादावाग्नितुल्य! त्वदाश्रितभक्तसमुद्रंपूरीकरण चन्द्रतुल्य! यतिराज! तिरुनारायणपुरे (बलरामपालित) यादवाद्रौ नित्यश्रियं वर्धयन् त्वं शाश्वतं वर्दस्व।

विशेषः - तोण्डनूरुवादे रामानुजः आदिशेषरूपे अदृश्यरूपे बाह्येस्थितः एककाले एव सहस्रसंख्याकजनं पराजितश्चकार।

फलश्रुतिः -

रामानुजचतुश्शलोकीं यः पठेन्नियतः सदा।
प्राप्नुयात् परमां भक्तिं यतिराजपदाब्जयोः।।



श्रीभाष्यरचनायै वरदराजस्वामिकृपा एव कारणम्। यामुनाचार्याः रामानुजं दृष्ट्वा अयमेव अस्मत्सम्प्रदयरक्षकः इति सम्भाव्य पेरुमालनुग्रहेण तान् अस्मत्सम्प्रदाये आनीतवन्तः। यामुनस्य वाच्छात्रयं पूरयित्वा कूरत्ताल्वान् सहायेन भाष्यपूरणवैभवमत्रैव।



अपारकरुणया सर्वान् समाधानैः समन्वयेन तृप्तान् चकार। अत्रैव ''तमरगन्ततिस्मेनि'' भाषन्तः एदुराजरु (मधुरभाषीरामानुजः) इति विग्रहरूपेऽपि स्तः।

भावः - इमां चतुश्शलोकीं ये सदा पारायणं कुर्वन्ति तेषां यतिराजरामानुज पादपद्मयोः पराभक्तिः स्यात्। सा भक्तिश्च दिने दिने अभिवृद्धिं प्रप्स्यति। आचार्याभिमानमेव मोक्षमार्गः। अतस्ते समुचितफलं प्राप्स्यन्ति।



तिरुमलक्षेत्रे श्रीदेवीभूदेवी समेतमलयप्पस्वामिने 26.02.2026 तिथ्यारभ्य 02.03.2026 पर्यन्तं नेत्रोत्सवत्वेन प्रवृत्तसालकट्ल ल्पवोत्सवकार्यक्रमेषु ति.ति.देवस्थानपालकमण्डल्यध्यक्षाः श्री बि.आर.नायुडु महोदयाः भागं गृहीतवन्तः। एतस्मिन्नेव कार्यक्रमे ति.ति.देवस्थान कार्य निर्वहणाधिकारी श्री मुद्दाड रविचन्द्र ऐ.ए.यस्., महोदयः अनुबन्धकार्यनिर्वहणाधिकारी श्रीवेङ्कय्यचौदरि महोदयः ऐ.आर.यस्., महोदयः मुख्यपर्यवेक्षणं भद्राधिकारी श्री के.वी. मुरलीकृष्णमहोदयः अन्ये प्रमुखाश्च भागं गृहीतवन्तः।



तिरुपतितिरुमलदेवस्थानकार्यनिर्वहणाधिकारी एफ्.ए.सि त्वेन स्वकार्यबाध्यतास्वीकर्ता मुद्दाड रविचन्द्र ऐ.ए.यस्., महाशयः 06.03.2026 तिथौ सम्पूर्णकार्यनिर्वहणबाध्यतां स्वीचकार। एवं ति.ति.देवस्थान यक्स्.अफिसियो सभ्यत्वेन च प्रमाणस्वीकारं चकार। अयं कार्यक्रमः अनुबन्धकार्यनिर्वहणाधिकारिणा सि.हेच्.वेङ्कय्यचौदरी ऐ.आर्.यस्. महाशयेन पर्यवेक्षितः।



तिरुमल श्रीवेङ्कटेश्वरालये 2026 मार्च प्रथमतिथौ तिरुमलक्षेत्रं प्रत्यगत भारत सुप्रींकोर्ट प्रधान न्यायमूर्तिः जस्टिस सूर्यकान्त अपि च आन्ध्रप्रदेश हैकोर्ट प्रधानन्यायमूर्तिः जस्टिस धीरज् सिंगूठाकुरु महोदयौ: रङ्गनायकमण्टपे स्वामिना शेषवस्त्र, श्रीवेङ्कटेशचित्रपटं अपि च तीर्थप्रसादान् प्रदत्तवन्तः ति.ति.देवस्थानपालकमण्डल्यध्यक्षः श्री बि.आर्.नायुडु महोदयः ति.ति.देवस्थानकार्यनिर्वहणाधिकारी श्रीमुद्दाडरविचन्द्र ऐ.ए.यस्., अपि च अनुबन्धकार्यनिर्वहणाधिकारी श्री सि.हेच्. वेङ्कय्यचौदरि ऐ.आर.यस्., महोदयाश्च।



तिरुमलक्षेत्रस्थान्नमय्य भवने 2026 फिब्रवरि 28 तिथौ ति.ति.देवस्थानस्य पराभवनामसंवत्सर (2026-27) पञ्चाङ्गमाविष्कुर्वन्तः ति.ति.देवस्थान पालकमण्डल्यक्षाः श्री बि.आर्.नायुडुमहोदयाः, अपि च ति.ति.देवस्थान कार्यनिर्वहणाधिकारी श्रीमुद्दाडरविचन्द्र ऐ.ए.यस्., अपि च पालकमण्डली सभ्याश्च।



तिरुमलक्षेत्रे अनन्ताल्वार् उद्याने (पुरिशैवारि) 2026 फिब्रवरि 22 तिथौ प्रवृत्तानन्ताल्वारु 972 अवतारमहोत्सव सन्दर्भे भागं गृहीत्वा भाषत्तः ति.ति. देवस्थानसंयुक्तकार्यनिर्वहणादिकारी डा. ऐ.शरत् विश्रान्त ऐ.ए.यस्., (विद्यावैद्यश्च) महोदयः।

# शङ्कराचार्यजयन्ती



- आचार्य जि.पद्मनाभम्
चरवाणी - ९२४७३२८२८६

भारतदेशे शैववैष्णवशाक्तेयभिन्नभिन्नमतविजृम्भण काले हिंसोपासनानां स्वेच्छाप्रवर्तने ज्ञानोपदेशात् लोके सुखशान्ति स्थापनार्थं सर्वज्ञः परमेश्वरः कैलासात् जगद्गुरुशङ्कर भगवत्पादत्वेन अवततार। हिंसाराधनं निषिद्ध्य आदित्याम्बिकाविष्णुगणपतिमहेश्वरकुमारस्वामीति षड्देवतोपसनां अङ्गीचकार। ‘‘षण्मत स्थापनाचार्यः’’ इति प्रसिद्धिं प्राप्य ‘‘शङ्करः शङ्कर’’स्साक्षदिति विद्वत्प्रशंसाः लेभे।

परमेश्वरप्रसादत्वेन आर्याम्बाशिवगुरुदम्पत्योः शङ्करः वैशाखशुद्धपञ्चम्यां अजायत। शङ्करावतारमधिकृत्य ‘‘श्रौतस्मार्त प्रतिष्ठार्थं करिष्यत्यवतारं स्वं शङ्करः इति कूर्मपुराणे प्रोक्तम्।

शङ्करः वर्षत्रये पितृवियोगमनुबभूव। माता बन्धुसाहाय्येन पञ्चमवर्षे उपनयनं कारितवती। अयं स्वल्पकाले एव वेदवेदाङ्गशास्त्रण्यभ्यस्य गुरुसमः अभूत्। कदाचित् भिक्षाटन समये अकिञ्चनस्थित्या बाधिता काचित् गृहिणी भक्त्या आमलकं शङ्करस्य कक्ष्यावस्त्रे निवेशितवती। तद्गृहावस्थां, दृष्ट्वा शङ्करः लक्ष्मीमस्तौषीत्। झटित्येव तद्गृहे कनकवर्षः वर्षितः। तत्सोत्रं कनकधारास्तवनाम्ना प्रचारे वर्तते। भक्त्या तत्पठनात् दारिद्र्यनाशः भवेत्। मातुः पूर्णानदीस्नानार्थं गमनागमन क्लेशं दृष्ट्वा शङ्करः तन्नदीं गृहसमीपे प्रवाहयामास। तदा प्रभृति अखण्डनदीति सा प्रसिद्धिं गता। अष्टमवयसि शङ्करस्य मात्रा विवाहसंकल्पः कृतः। शङ्करः सन्न्यासी भवितुं निश्चयं चकार। माता तदर्थं नाङ्गीकरिष्यति, एवं सति कदाचित् पूर्णानद्यां स्नानं कुर्वन् शङ्करः आसीत्, मकरः जलान्तः आकृष्य गच्छति। मम मरणमासन्नम्। मम सन्न्यासवाञ्छा अपरिपूर्णेति शङ्करः अक्रोशञ्चकार। माता पुत्रवात्सल्यात् तव वाञ्छां पूरय इति पुत्रसन्न्यासत्वाय अङ्गीचकार। झटिति सः ‘‘अभयं सर्वभूतेभ्यो मत्तः स्वाहा’’ इति प्रेषोच्चारणं कृत्वा आतुरसन्न्यासं स्वीचकार। ततः मातुः पादाभिवनन्दनं कृत्वा मत्स्मरणादेव प्रत्यक्षीभूय तवाज्ञां निर्वर्तयिष्यामीत्युक्त्वा वाग्दानं, दत्वा संसारबन्धविमुक्तः बभूव। नर्मदातीरे गोविन्दभगवत्पादं गुरुत्वेन संकल्प्य तं स्तुत्वा ‘‘स्वाभिन्ना न पृथिवी न जलंनतेजो। न स्पर्शः नो न गगनं न च तद्गुणाः वा। नापीन्द्रियाण्यपि नु विद्धि ततोऽव शिष्टो। यः केवलोस्ति परमः स शिवोऽहम’’स्मीति अद्वैतभावं प्रदर्शितवान्। गोविन्दभगवत्पादाः एनं महापुरुषं ज्ञात्वा अनुगृह्य स्वगुरुत्वमङ्गीकृत्य सन्न्यासं दत्वा तत्त्वोप्रदेशं चकार। कदाचित् नर्मदानदीप्रवाहे महोद्धृते शिष्येषु भयभ्रान्तिपतितेषु शङ्करेण एकं कुण्डमभिमन्त्र्य प्रवाहमहमध्ये स्थापनात् जलं सर्वं कुण्डान्तः पर्याप्तमासीत्। सर्वे आश्चर्यचकिताः आसन्। गोविन्दभागवत्पादः ‘‘व्यासः आत्मना’’ एकः शिष्यः नर्मदा नदी प्रवाहं कुम्भे बन्धनं करिष्यति, सः महापुरुषः प्रास्थानत्रयभाष्यंरचयिष्यितीति स्वप्नप्रोक्तवचनानि स्मृत्वा शङ्करं काशीक्षेत्रं गत्वा विश्वनाथानुग्रहं प्राप्य प्रस्थानत्रयभाष्यं कुरु इत्यादिदेश। काशीक्षेत्रसञ्चारणसमये कदाचित् विश्वनाथः शुनकनानुसृतः सुराकुण्डं वहन् चण्डालवेषे शङ्करेण दृष्टः। शङ्करः तं ‘‘दूरमपसर’’ इत्यवदत्। तदा विश्वनाथरूपचण्डालः तमुद्दिश्य स्वामिन्। प्रपञ्चे सर्वपदार्थः एकः एव कं दूरमपसर



इत्यदिशसि? इति पप्रच्छ। शङ्करः प्राप्तज्ञानोदयः मम ब्राह्मणाहङ्करभावनां दूरीकर्तुं विश्वनाथः एव मां पप्रच्छेति जज्ञे। शिवः यथार्थरूपे प्रत्यक्षीभूय व्यासस्य ब्रह्मसूत्राणां भाष्यं रचयेत्याज्ञापयामास। गुर्वादिशं परमेश्वरानुग्रहं प्राप्तः शङ्करः शिष्यगणैः सह बदरीक्षेत्रं गत्वा तत्र प्रस्थानत्रयस्य अद्वैतपरतया भाष्यं, अन्यांश्च कांश्चित् ग्रन्थान् व्यरचीत्।शङ्करस्य सञ्चारकाले कावेरीनदीतीरवासी विप्रपुत्रः शङ्करदर्शनं प्राप्य संसारविमुक्तं कृत्वा स्वं शिष्यत्वाय प्रार्थयामास। शङ्करः तदभिलाषमङ्गीकृत्य ''सनन्द'' नामकरणं कृत्वा प्रथमशिष्यञ्चकार। अनुपमगुरुभक्तिमानयम्। अत एवास्मिन् वात्सल्याधिक्यं दर्शययति स्म। अन्यशिष्याः एतस्मिन्नसूयाग्रस्ताः आसन्। सर्वज्ञः विषयमेनमजीनीत्। कदाचित् सनन्दे गङ्गातीरे सति ''सनन्द!'' इत्याह्वयामास। गुरोरनुग्रहः इति महावेगेन गङ्गाजलोपरि पादयात्रया आगत्य सनन्दः गुरुं प्राप। तस्य पादस्य निवेशनस्थले पद्ममालारव्रत्वेन स्थितं सत् जलमज्जनेन विना तं रक्षति स्म। एवं सनन्दे गुरुसमीपमागते शिष्याः तस्य गुरुभक्तेः तं अभिनन्दयामासुः

तदा प्रभृति तस्य पद्मपादः इति व्यवहारः आसीत्। जगद्गुरोः काशीसञ्चरणसमये वृद्धब्राह्मणः ''डुकृञ्करणे'' इति व्याकरणशास्त्रं कण्ठस्थीकरोति स्म। शङ्करः तस्मिन् दयया व्याकरणशास्त्रं मृत्युभीतेः न रक्षिष्यति गोविन्दं भजेति आशुरूपेण कांश्चित् श्लोकानुवाच। ते एव भजगोविन्द श्लोकाः इति मोहमुद्गरः इति प्रसिद्धिं गताः। अद्वैतसारभरिताः एते श्लोकाः। शङ्करेण गङ्गानदीतीरे शिष्येभ्यः सूत्रभाष्य पाठबोधनावसरे वृद्धब्राह्मणः ''तदनन्तरप्रतिपत्तौ रहति सम्परिष्क्तः प्रश्ननिरूपणाभ्यां'' इति सूत्रं कथं व्याख्यातव्यमिति पप्रच्छ। पञ्चाग्निविद्यासम्बन्धि इदं सूत्रम्। जीवः एकं देहं परित्यज्य अन्यस्मिन् देहे प्रविशन् सूक्ष्मदेहोत्पत्तिकारणभूत सूक्ष्मान् आत्मना सह आनीय गच्छति वा अथवा तत्रैव सम्पादयति वा इति प्रश्नः। आत्मना सह आनीय गच्छतीति समाधानम्। प्रवहणमहाराजः श्वेतकेतोः इमं विषयं विवृणोतीति सूत्रार्थं शङ्करः समन्वयञ्चकार। वृद्धब्राह्मणेन पूर्वपक्षे कृते शङ्करः तं खण्डयामास। एवं द्वयोर्मध्ये अष्टदिनपर्यन्तं चर्चा प्रवृत्ता। तदा सनन्दः गुरो! अयं व्यासभगवानेव स्यादिति सूचयामास। तदा व्यासे निजरूपेण साक्षात्कृते शङ्करस्य भाष्यरचनां प्रशंस्य त्वं अष्टायुष्कः जातः। महाबुद्धिव्यासङ्गेन पुनः अधिकाष्टवर्षायुः प्राप्तोऽसि। परमेश्वराज्ञया तदनन्तरमपि षोढशवर्षपर्यन्तं जीविष्यसि। तव भाष्यं सूर्यचन्द्रनक्षत्र स्थितिपर्यन्तं सर्वजनामोदं प्राप्स्यतीति आशीः प्रयुज्य अदृश्यः बभूव।

**अष्टवयांसि विधिना तववत्सदत्तानि**
**.............. रविचन्द्रतारकम्।**

तस्मिन् काले माहीष्मतीनगरे मीमांसाशास्त्रनिष्णातः मण्डनमिश्रः ''कर्म एव ब्रह्म'' इति वादं करोति स्म। तं पराजित्य अद्वैतसिद्धान्तं तेन अङ्गीकर्तव्यमिति शङ्करः सङ्कल्प्य तथैव तं पराजितश्चकार। सोऽपि शङ्करशिष्यो बभूव। स एव सुरेश्वराचार्यः। शङ्करप्रधान शिष्याणां चतुष्टये अयं द्वितीयः। अस्य भार्या उभयभारती। सा मय्यपि विजयानन्तरमेव तव सम्पूर्ण विजयः सिद्धयतीत्यवोचत्। ततः सा कामकलाविषयान् तं पप्रच्छ। ब्रह्मचारी शङ्करः मासावधि पर्यन्तं समयः देयः इत्युक्त्वा तदनुमत्या मृतराजदेहे प्रविश्य तस्य भार्याभ्यः कामकलारहस्यानि अनुभवतः ज्ञात्वा पश्चात् उभयभारतीमपि

जितवान्। मण्डनमिश्रः ब्रह्मावतारः। उभयभारतीसरस्वत्यवतारः। तस्यां स्वर्लोकगमनसंसिद्धायां शङ्करः वनदुर्गामन्त्रेण तां बद्ध्वा श्रृङ्गेरीनगरे प्रतिष्ठितवान्। श्रृङ्गेरीक्षेत्रशारदादेवी एवमाविर्भूता। शङ्करस्य देशसञ्चारसन्दर्भे पूर्वमीमांसायां महापण्डितः प्रभाकरः जडप्रवृत्तौ विद्यमानं पुत्रं शङ्कर सन्निधिमानीय पादाभिवन्दनं कारयामास। तदा तं बालं कस्त्वं कस्य सम्बन्धी, किमर्थं जड इव प्रवर्तसे इत्यपृच्छत्। तदा सः बालः नाहं जडः मत्सन्निधौजडदेहः एवं प्रवर्तते। अहं षड्र्मिप्रदुर्भावविकार रहितः केवलमानन्दस्वरूपः इति समादधौ। ''नाहं जडः किन्तु जडः प्रवर्तते। मत्सन्निधानेन न सन्निधेः गुरो। षडोर्मितद्भावविकारिवर्जितं शङ्करः एनं शिष्यञ्चकार। हस्तामलकवत् अद्वैततत्त्वकथनात् हस्तामलकः इति तस्य नामकरणञ्चकार। शङ्करप्रधानशिष्यचतुष्टये अयं तृतीयः।

शङ्करस्य प्रधानशिष्येषु गिरिः चतुर्थः। विलक्षण स्वभाववान् मन्दमतिः कदाचित् शङ्करप्रोक्त पाठकण्ठस्थीकरणे निमग्नः शङ्करपाठबोधन समये नागतः। पाठप्रारम्भाय अन्यशिष्याः शङ्करं पप्रच्छुः। ते शिष्याः गिर्या गमनपर्यन्तं न निरीक्षितव्यम्। तस्य पाठबोधः कुड्यस्य पाठबोधः एव इत्यवोचन्। अन्यशिष्यमनोभिप्रायं ज्ञात्वा शङ्करः स्वशक्तिं काञ्चित् तस्मिन् प्रवेशयामास। सः गिरिः तत्सकाशमागत्य विदिताखिल शास्त्रशुधाजलधे .......... भव शङ्करदेशिक मे शरणम्। इति तोटकवृत्तैः गुरुं स्तुवन्नासीत्। आसुधारया गुरुस्तुतिं कुर्वन्तं दृष्ट्वा ते अन्ये शिष्याः दिग्भ्रान्तिं प्राप्ताः। तदा प्रभृति तस्य गिरेः तोटकाचार्यः इति नामागतम्। अद्यापि शङ्करभक्ताः तोटकछन्दश्शोकैः स्तुवन्ति।

शङ्करः श्रीशैलमल्लिकार्जुनस्वामिदर्शन सन्दर्भे सन्ध्यारम्भविजृम्भितम् ...... भृङ्गीच्छानटनोत्कटः इति अद्वैत श्लोकद्वयमुवाच। शिवानन्दलहर्यां विद्यमानत्वात् स्तोत्रराजं शङ्करकृतमेवेति पण्डिताः वदन्ति।

तस्मिन् काले कापालिकनिवासे श्रीशैलप्रान्ते कापालिकः शङ्करं संस्तुत्य तव शरीरव्यामोहः नास्ति किल। भैरवस्वामिने त्वां समर्पयितुमिच्छामीत्यवोचत्। शङ्करः यस्य कस्यापि मनुष्यस्याभावे आगच्छ इत्यवोचत्। कदाचित् शिष्येषु स्नानध्यानार्थं दूरङ्गतेषु भैरवस्वामी आगत्य शङ्करशिरः खण्डयित्वा भैरव स्वामिने समर्पणाय संसिद्धः अभूत्। तदा पद्मपादस्य एतद्विषयस्फुरणात् नृसिंहस्वामिनं आवाहयित्वा अन्यशिष्यैः सह तत्रागत्या कापालिकं खण्डशः अच्छिनत्। जगद्गुरोः सञ्चारे माता अवसानदशायां पुत्रं सम्मार। झटिति शिष्येभ्यः कर्तव्यतां समर्प्य आकाशगमनद्वारा मातृसकाशं प्राप्य मातरं परमानन्दभरिताञ्चकार। मातुः परमेश्वरदशर्नञ्चकार। सा शिवसायुज्यं नैच्छत्। तदा झटिति श्रीमन्नारायणध्यानात् भगवान् श्रीमन्नारायणः प्रत्यक्षमभूत्। तद्दर्शनं प्राप्य विष्णुसायुज्यमवाप। ज्ञातिभ्यः दहनसंस्कारकर्मणि सहकाराभावे गृहे पश्चिमभागे दहन संस्कारं कृत्वा मातृऋणविमुक्तः आसीत्। ज्ञातीन् वेदबाह्याः भवेयुरिति शशाप।

शिष्यैः सह भारतदेशं सञ्चार्य विविधशास्त्रपण्डितान् विविधसम्प्रदायोपासकान् शास्त्रवादनेन पराजित्य क्रमशः कास्मीरे शारदापीठं जगाम। तत्र उद्दण्डपण्डितान् पराजित्य सर्वज्ञपीठमधिष्ठितवान्। अवतारप्रयोजनं पूरयित्वा कुरुक्षेत्र देवताप्रार्थनासु प्रवर्तमानासु अवतारं समाप्य कैलासं जगाम। अद्वैतसिद्धान्त प्रचारार्थं चतुर्दिक्षु पीठचतुष्टयं संस्थापयामास। प्रग्दिशि गोवर्धनमठे ऋग्वेदं प्रज्ञानं ब्रह्मेति वाक्यं प्रतिष्ठापितवान्। पीठस्य तस्य पद्मपादमधिपतिञ्चकार। पश्चिमे द्वारकामटे सामवेदं तत्त्वमसीति महावाक्यं संस्थाप्य हस्तामलकं पीठाधिपतिञ्चकार। दक्षिणदिशि श्रृङ्गेरीपीटे यजुर्वेदं अहं ब्रह्मास्मीति महावाक्यं स्थापयामास। तस्य सुरेश्वराचार्यमधिपतिञ्चकार। उत्तरदिशि ज्योतिर्मठे अथर्ववेदे अयमात्मा ब्रह्म इति वाक्यं स्थापयामास। अस्य तोटकाचार्यमधिपतिञ्चकार। एवमद्वैतसिद्धान्तप्रचारय चतुर्दिक्षु मठाधिपतीत् कृत्वा जीवितं तदर्थमङ्कितञ्चकार। जीवितकालः द्वात्रिंशदपि अन्यासाध्यरीत्या अपारविज्ञानं लोकाय ददौ। अयं शताधिकग्रन्थान् व्यरचीत्। १. स्तोत्रवाङ्मयमिति भागत्रयत्वेन तस्य रचनाः विभक्तुं शक्यते। स्तोत्रवाङ्मये गणपति विश्वनाथ-श्रीमन्नारायण-ललितादिदेवतावैभवं शङ्करः मधुरातिमधुरतया अभिवर्णयामास। स्तोत्र वाङ्मये शिवानन्दलहरी, सौन्दर्यलहरी अग्रश्रेणौ वर्तेते।

**शङ्करगुरुचरणानां नमनं दृढचरणकरुणानां।**
**परिभूतकिसलयानां सम्भूयात्कलुषवार्धितरणानाम्।।**

# आसन्ने मरणे स्मरणानुगुणं पुनर्जन्म वा मोक्षप्राप्तिः

- डा. जि.चन्द्रशेखर्
चरवाणी - ९४९१७४५५०६

पुरा माधवपुरनामग्रामे भक्तः एकः नित्यंभगवत्पादारविन्द स्मरणादन्यत् न जानाति स्म। सः भगवत्प्राप्तिरेव जीवितलक्ष्यमिति भावनया पूजाध्यात्मिकचिन्तनाद्यन्य साधनानुष्ठानैः मुक्तिमार्गे जीवति स्म। लौकिक चिन्तनाविमुखं तं बहवः शिष्याः समाश्रिताः। ते तस्मात् ज्ञानोपदेशं प्राप्य प्रवृद्धभक्तियुताः आसन्। शिष्येभ्यः अयं ज्ञानगुरुः मार्गगामी बभूव। तदुक्तिं त्रिकरणाशुद्ध्या आचरन्तः लोकादर्शप्रायाः आसन्।

वार्धक्ये आगते अयं गुरुः काश्यां स्वमरणं यथा स्यात् तथा करणीयमिति शिष्यानपृच्छत्। गुरोरिष्टं पूरयितुं सर्वे शिष्याः सन्नद्धाः। शिबिकायां आसीनं कृत्वा नयन्तः काशीसमीपप्रान्तं प्रापुः। काशीक्षेत्रमागतं वा इति शिष्यान् पृष्ट्वा पञ्चमकुलनिवासस्थानं आगताः इति शिष्येभ्यः समाधानं शुश्राव। तेषु दिनेषु अस्पृश्यतादुराचारः आसीत्। प्राणावसान समये तस्य कर्णे अस्पृश्यपञ्चमकुल निवासस्थानमित्येव श्रुतम्। तद्वाक्यश्रवणादेव झटिति विस्मृतदैवभक्तिमानयं पञ्चमकुलनिवासचिन्तावानेवासीत्। तदैव तस्य प्राणाः गताः।

अवसानसमये श्रुतशब्दतद्गतचिन्तनाभिः चिन्तनानुगुणतया सः चण्डालकुले जन्मावाप। पूर्वजन्मवासना, पूर्वपुण्यफलञ्च तस्यासीत्। चण्डालकुले जातस्य अस्य पिता ग्रामबाह्यप्रदशे निवसन् ग्रामरक्षकः आसीत्। दिने दिने रात्रौ यामे यामे पटहं वादयन् "पाराहुषारु" इति वादयन् राजोद्योगं निर्वहति स्म। गुरुः चण्डालकुलोत्पन्नोऽपि पूर्व जन्मवासनया मौनावलम्बी एकान्ततया आसीत्। सहचरवासिनः एनं अप्रयोजकः मूकः इति वदन्ति स्म। पिता तं कार्यव्यापृतं न करोति स्म। अयं कर्मविमुखः पुनजन्मभीत्या लौकिकचिन्तादूरः कालं यापयतिस्म।

एवं गच्छति काले तस्य पितुःग्रामान्तरगमनावश्यकता आसीत्। सः राजसकाशं गत्वा राजन्। अत्यावश्यककार्यं निमित्तीकृत्य ग्रामान्तरं गमिष्यामि। मत्स्थाने मत्पुत्रः ग्रामरक्षणकार्यं निर्वहिष्यतीत्यवोचत्। राजा अङ्गीचकार। ग्रामरक्षकपुत्रः मूकवत् विद्यामानः किं रक्षणकार्यं कथं निर्वहिष्यतीति राजा द्रष्टुं वेषान्तरे तस्य अज्ञाततया तं अनुससार। निशि प्रथमभागे सः चण्डालपुत्रः पटहंवादयन् एवमुवाच -

**कामः, क्रोधश्च लोभश्च एते तिष्ठन्ति तस्कराः।**
**ज्ञानरत्नापहाराय तस्मात् जागृत जागृत।।**

एतच्छलोकं श्रुत्वा राजा आश्चर्यचकितः अयं बालः न मूकः महाज्ञानीति सदात्मा अस्य शरीरे वर्तते इति भावयामास।

द्वितीययामे सः ज्ञानी-

**जन्मदुःखं जरा दुःखं जाया दुःखं पुनः पुनः।**
**संसारसागरं दुःखं तस्मात् जागृत जागृत।।**

इत्यवोचत् राजा श्लोकमिमं श्रुत्वा परवशः आसीत्। सः ज्ञानी तृतीययामे -

**मातानास्ति पिता नास्ति नास्ति बन्धुस्सहोदरः।**
**अर्थं नास्ति गृहं नास्ति तस्मात् जागृत जागृत।**

एनं श्लोकमपि श्रुत्वा राजा क्षणमचेतनः बभूव। ततः सः चतर्थयामे -

**आशया बध्यते लोको कर्मणा बहुचिन्तया।**
**आयुःक्षीणं न जानाति तस्मात् जागृत जागृत।।**

एतच्छ्लोकं श्रुत्वा राजा पुलकितगात्रः बभूव। अयं बालः जीवन्मुक्तः जन्मान्तर स्मृतिमान् अज्ञानान्धकारनिमग्नानां मार्गदर्शकः महानुभावः इति मेने। ततः बालकस्य पितरि आगते राजास्थाने तस्य समुचितमुद्योगं दास्यामीति तं बालकं त्वया कीदृशः उद्योगः अपेक्ष्यते इति अपृच्छत्। तदा सः घोरपापहत्याकारिणां मरणशिक्षाप्रदानोद्योगः दीयतां इति

अपृच्छत्। मरणदण्डनोद्योगे अहं स्वहस्ताभ्यां खड्गेन शिरः छेदं करिष्यामीत्यवोचत्। राजा अङ्गीकृत्य मरणदण्डननिर्वाहकोद्योगमेव तस्य ददौ। ततः बालः स्वकर्तव्यं निर्वहति स्म।

एवं दिनेषु गच्छत्सु देवलोके यमः चिन्ताक्रान्तः ब्रह्मसकाशमागत्य पापात्मानः कर्मानुभवाय मम लोकं नागच्छन्ति। मम किमपि कर्म नास्ति भूलोके पापात्मनः एव न सन्ति वा? मम विचारकारणमिदमेवेत्यवोचत्।

ब्रह्मा एतत्परिशोधनार्थ भूलोकंमाजगाम। राजा दोषिणां मरणदण्डनशिक्षां ददाति। दोषिणः मरणशिक्षा दण्डनवेदिकासकाशमानीयन्ते।

मरणशिक्षानिर्वहणवेदिकापुरतः शिवस्य विष्णोश्च दिव्यमङ्गलमूर्तिछायचित्राणि पुष्पालङ्कारैः धूपदीपसुगन्ध भरितत्वेन निवेशिताः। द्रष्टॄणां मनः भक्तिपरिपूरितं सत् हस्तावुन्नम्य नमस्कर्तव्यमिति भावनास्फोरकं नेत्रानन्दकरं भवतिस्म। चित्रपटपुरतः पुराणकाव्यरामायणभारतभागवतादिपवित्रग्रन्थाश्च निवेशिताः। तत्स्थानं पवित्रदेवालयः एव न मरणालयः इति द्योत्यते। मरणशिक्षानिर्वाहकः सः बालः शिरः छेदनात् पूर्वं दोषिणः नमस्कृतान् कृत्वा तन्मनः अर्द्रभाव पर्यन्तं नीत्वा, भगवन्नाममाहात्म्यं सङ्कीर्तनञ्च मधुरातिमधुरं उपदिशतिस्म। तस्य वचनानि श्रुण्वन्तः दोषिणः सर्वं विस्मृत्य यदा सन्ति तदा तयोरज्ञाततया बाह्यप्रदेशात् तेषां शिरः छिनत्तिस्म। देवनामसङ्कीर्तने कर्णे पततेसति तेषां जीवगमनात् तेषां मनः प्रक्षालितं सत् ते मुक्तिं प्राप्नुवन्ति। तदा ब्रह्मा तं मरणदण्डननिर्वाहक बालं ज्ञानिनं किमर्थमेवं करोषि इत्यपृच्छत्। तदा सः बालः ‘‘मम गतजन्मनि मरणसमये देवनाम स्मरणेन विना चण्डालग्रामपदं श्रुतवानस्मि। तदालोचनाः मम कर्णे पतिताः। अत एवाहं चण्डाल ग्रामे जातः। गीतायां भगवानपि क्रूरात्मनोऽपि मरणसमये मन्नामस्मरणात् मत्सन्निध्यं प्राप्स्यन्ती त्युक्तवान्। अतः सुलभोपायेन दैवनामस्मरणं कारयित्वा एतान् दोषिणः मुक्तान् कर्तुं एवं करोमि। सर्वं श्रुत्वा ब्रह्मा संतृप्तः सानन्दः तस्मिन्नाशीः प्रत्युज्य त्वं सत्यलोकं गमिष्यसि अथवा मुक्तिमेष्यसि यथेच्छं प्राप्नुहि इत्युक्त्वा अन्तर्हितः। अतः अन्तकाले सर्वेषां भगवन्नामस्मरणं एव परमौषधमिति ज्ञेयम्।

(सप्तमपुटात्)

## परशुरामजयन्ती

तर्काचार्यभाषाप्रवीणकम्भंपाटिरामगोपालकृष्णमूर्तिरेवंवदति - स्वदत्तदानभूमौ तव निवासः अनुचितः इति ब्राह्मणैः कथनात् तदुपरिक्रोधपरवशोऽयं इतः परं बहुदानप्राप्तानामपि युष्माकं विद्याप्राप्तिरेव स्यात् न धनप्राप्तिरिति परशुरामः ब्राह्मणान् शशाप।परशुरामावतारे विलक्षणानि सन्ति।आजन्मक्षत्रियकुलहन्तायं श्रीरामेण पराजितः। विवाहानन्तरं एकस्य विष्णोः अवतारेण अन्यः अवतारः पराजितः। पद्मपुराणमनुसृत्य भगवच्छक्त्यावेशावतारत्वात् महात्मनां भगवच्छक्तिविशिष्टानां भागवतोत्तमानमयं उपास्यः न भवति। रामकृष्णवतारयोः परिपूर्णत्वात् विशिष्ट भगवद्भक्तिविप्रजनेभ्यः उपास्यौ रामकृष्णौ मोक्षप्रदौ भवतः।

ब्रह्मपुत्रानदीतीरे परशुरामकुण्डे परशुरामेण स्नानाचरणात् नष्टमातृहत्यापातकः सः बभूव। अद्यापि परशुरामकुण्डं महातीर्थत्वेन विराजते। वैशाखशुद्ध द्वादशीरात्रौ पुनर्वसुनक्षत्रे परशुरामः जातः इति निर्णयसिन्धुवचनम्। एतज्जयन्ती उत्तरहिन्दूस्थाने मधुरावाराणासी नगरेषु अधिकतया निर्वाह्यते। अस्सांराष्ट्रे कामाक्षीदेवालये एव जमग्न्याश्रमः वर्तते इति स एव परशुरामालयः इति वदन्ति। दक्षिणभारते मलबार् भूमौ ईतिबाधा कदापि नस्यात्, तत्र रत्न गिरौ परशुरामारधनात् शत्रुनाशः भवेदिति व्रजोत्सवचन्द्रिकायां प्रोक्तम्।

**ब्रह्मपुराणे कार्तवीर्याजुनकथा -** कृतवीरपुत्रः कार्तवीर्याजुनः दशसहस्रवर्षपर्यन्तं राज्यमपालयत्। महाभयङ्करतपसा दत्तात्रेयं प्रसन्नं कृत्वा सहस्रहस्तत्वं, सज्ञनरक्षणत्वं, धर्मपरितपालनत्वं, युद्धरङ्गे आत्मनः अधिकादेवमरणमिति चतुर्वरानवाप। दाहोपशमनाय अग्निदेवप्रार्थितः सप्तद्वीपान् भिक्षतया ददौ। सप्तद्वीपेषु सर्वेषु दह्यमानेषु आतपमुन्याश्रमोऽपि दग्धः बभूव। वरुणपुत्रः आतपः दह्यमानदृश्यमसहमानः जमदग्नेः पुत्रः परशुरामः कार्तवीर्याजुर्नं संहरिष्यतीति शापं ददौ।

**कार्तवीयस्य योजन्म कथयेदिहनित्यशः।**
**न तस्य वित्तनाशः स्यान्नष्टं प्रतिलभेच्चसः।।**


इति ब्रह्मपुराणे प्रोक्तम्।

चित्रकथा

# तृप्तेरधिकं ऐश्वर्यं नास्ति


तमिलमूलम् - श्रीमतीश्रीनिधिः
आन्ध्रानुवादः - कथामोलका उत्तरफल्गुणी
चित्राणि - श्री कमलकण्णन्

संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०













झटिति पराशयवेदिनो हि विज्ञाः।


कठिनभूशय्या।
सम्पदः कमण्डलम्, दण्डः, भिक्षापात्रम् लघुसञ्चिका एव।
स्वामिन्! सम्पन्नाम किम्।
स्वामिन् संतृप्त्या जीवनं कथं? बोधयत।
स्वामी तथैवति सर्वेभ्यः वक्तुं प्रारेभे।
लब्धसम्पदा ससन्तोषजीवनमेव यथार्थसम्पत्। इयं सम्पत् मानसिकप्रशान्तिं, परिपूर्णारोग्यं ददाति। एतद्दशैव धनादपि तृप्तिपदमैश्वर्यम्।
बहुसम्पादनेन तृप्तिराहित्यजीवनं व्यर्थम्। सन्तोषः अस्मन्मनसि एव वर्तते। स्वल्पसम्पद्विषयैरपि सन्तोषप्राप्तिः। स्वल्पसम्पदः अन्येभ्यः अकिञ्चनेभ्यः साहाय्याचरणम्, सन्तोषः स्वसम्पदाधारभूतः न भवति। अस्मन्मनस्तत्त्वमाधारीकृत्यैव सन्तोषः स्यात्। एवं प्रवर्तनादेव अस्मज्जीवितं सुखमयं स्यात्।
नीतिः 'तृप्तेरधिकं ऐश्वर्यं नास्ति। सन्तोषादधिकं ऐश्वर्यं नास्ति। इयमेव एतत्कथानीति।

# एप्रेल् 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९८४९२६४६०७





१.मेषराशिः - आरोग्यं उत्साहः शुभकार्येषु निमग्नता, शान्तस्वभावः आध्यात्मिक - चिन्तनम् धनव्ययः सम्भवन्त्यपि तदा तदा वृथा विवादाः शरीरक्षोभा, देहपीडा, मनसः दौर्बल्यं आत्मन्यूनता सम्भविष्यन्ति। नवग्रहराधनं करणीयम्।



२.वृषभराशिः - उत्साहः उपन्यासप्रदाने इच्छा, सोदरलाभः, आत्मोन्नति अपरिषकृतकार्याणां परिष्कारः, दैवदर्शनं अधिकारजनद्वाराप्रशंसाः शुभकार्येषु निमग्नता, बन्धुमित्रसमागमः, सुखजीवनं च भविष्यति अस्मिन् मासे। शिवाराधनं कर्तव्यम्।



३. मिथुनराशिः - विदेशभ्रमणं, भाग्यलाभः, पारंपर्यधनप्राप्तिः पितृचिन्ता, उद्योगलाभः, व्यापारलाभः आत्मोन्नतिः, अधिकारजनप्रशंसा, सम्माननं, भविष्यन्त्यपि अधिककोपः आध्यात्मिकचिन्तनम् आर्षवाङ्मयपठनं उत्साहः सम्भवन्ति। अस्मिन् मासे विष्णोः आराधनं करणीयम्।



४.कर्काटकराशि : - अधिकधनव्ययः, वृथाप्रयाणानि, पुराणपठनश्रद्धा, आध्यात्मिकजीवने निमग्नता, भाग्यलाभः उद्योगोन्नतिः उद्योगपरिवर्तनं, व्यापारलाभः सङ्कल्पितकार्याणां फलप्राप्तिः सम्भवन्ति। शिवाराधनं करणीयम्।



५. सिंहराशिः - वृथाविवादाः धनव्ययः, धनागमने कष्टानुभूतिः, अनारोग्यचिन्तनम् स्वीयजनद्वारा निन्द, आत्मन्यूनता क्लेशाः सम्भवन्त्यपि तदा तदा अनूहयधनागमनम् कुटुम्बजनादरणम् अधिकारजनप्रशंसाः दैवदर्शनं च भविष्यन्ति। शनिग्रहाराधन कर्तव्यम्।



६. कन्याराशिः - आरोग्यविषयकश्रद्धा, आवश्यकी चिन्तितकार्यसाफल्यं स्त्रीजनद्वारा आनुकूल्यता, सोदरलाभः आध्यात्मिककार्येषु श्रद्धा, निपुणता, उद्योगपरिवर्तनं च भविष्यन्ति। लक्ष्मीपूजनं करणीयम्।



७. तुलाराशिः - शुभकालः शुभयोगसुप्रितः, धनलाभः, पारंपर्यभाग्य प्राप्तिः चिन्तितकार्य साधनम् एतैः सह मनोचिन्ता तदा तदा सम्भवति। स्त्रीजनद्वारा लाभः आत्मोन्नतिः, अधिकारजनप्रशंसा, उद्योगलाभः भविष्यन्ति। शिवाराधनं करणीयम्।



८. वृश्चिकराशिः - शुभकार्यार्थं धनव्ययः मनोव्यथा, स्त्रीजनद्वारादुःखम् वृधाविवादाः सम्भवन्त्यपि प्रयाणलाभः आध्यात्मिकप्रसङ्गाः, व्यापारद्वाराधनगमन-चिन्तनम् बन्धुमित्रैः सह समागमः भविष्यन्ति। नवग्रहाराधनं करणीयम्।




९. धनूराशिः - उत्साहः, विनूत्नकार्याचरणद्वारा यशःप्राप्तिः प्रयाणनष्टम्, चिन्तनं, भाग्यलाभः ज्ञानसाधनेच्छा पुत्रलाभः शुभकार्यनिमग्नता, गृहयोगः, बन्धुमित्रसमागमः भविष्यन्ति अस्मिन् मासे। शनिग्रहाराधनं कर्तव्यम्।



१०. मकरराशिः - वाक्पारुष्यम् शुभकार्येभ्यः धनव्ययः भातृचिन्ता, आध्यात्मिकाकार्येषु निमग्नता ज्ञानसाधनेच्था मासोत्तरार्धे उद्योगलाभः, सम्भविष्यन्त्यिपि अधिकारजन द्वारा पीडा, कुटुम्बे विवादाः सम्भविष्यन्ति। शिवाराधनं करणीयम्।



११. कुम्भराशिः - अनारोग्यचिन्ता, अधिकधनव्ययः, कुटुम्बे वृथाविवादाः स्थानपरिवर्तनसूचना, दुर्वार्ताश्रवणम् एकान्तजीवनेच्छा भविष्यन्त्यपि उत्साहः, पुत्रकलत्रमित्राणां आर्थिकाभिवृद्धिः, तेषां सहकारः अपि संभविष्यन्ति। नवग्रहाराधनं करणीयम्।



१२. मीनराशिः - शरीरस्य अस्वास्थ्यम् वाहनलाभः, दुःस्वप्नाः, निद्राभङ्गः स्थानपरिवर्तनं, धनागमनचिन्ता भविष्यन्त्यपि भाग्यलाभः तदा तदा कुटुम्भलाभः व्यापारचिन्तनम् मित्रजनद्वारा-लाभः सम्भवन्ति। लक्ष्मी देव्याः आराधनं कर्तव्यम्।



तपोवनानि नाम अतिथिजनस्य स्वगेहाः।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D., P.G.Dip in JMC on behalf of Tirumala Tirupati Devasthanams and Printed and Published at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati-517 507. Editor: Dr.V.G. Chokkalingam, M.A., Ph.D. P.G.Dip in JMC.

२३-०४-२०२६ बृहस्पतिवासरः
प्रातः - .... रात्रौ - अङ्कुरार्पणम्
२४-०४-२०२६ भृगुवासरः
प्रातः - ध्वजारोहणम्, रात्रौ - महाशेषवाहनम्
२५-०४-२०२६ मन्दवासरः
प्रातः - लघुशेषवाहनम्, रात्रौ - हंसवाहनम्
२६-०४-२०२६ भानुवासरः
प्रातः - सिंहवाहनम्, रात्रौ - मौक्तिकमण्टपम्
२७-०४-२०२६ इन्दुवासरः
प्रातः - कल्पवृक्षवाहनम्, रात्रौ - सर्वभूपालवाहनम्
२८-०४-२०२६ भौम्यवासरः
प्रातः - आन्दोलिकायां मोहिन्यवतारः, रात्रौ - गरुडवाहनम्
२९-०४-२०२६ सौम्यवासरः
प्रातः - हनुमद्वाहनम्, सायं वसंतोत्सवः, रात्रौ - गजवाहनम्
३०-०४-२०२६ बृहस्पतिवासरः
प्रातः - सूर्यप्रभवाहनम्, रात्रौ - चन्द्रप्रभवाहनम्
०१-०५-२०२६ भृगुवासरः
प्रातः रथोत्सवः, रात्रौ - अश्ववाहनम्
०२-०५-२०२६, मन्दवासरः
प्रातः - चक्रस्नानम्, रात्रौ - ध्वजावरोहणम्



कीलपट्ल
## श्रीकोनेटिरायस्वामिनः
## ब्रह्मोत्सवः

तिरुपतिस्थ
## श्रीगोविन्दराजस्वामिनः
## ब्रह्मोत्सवः



२२-०४-२०२६ बृहस्पतिवासरः
प्रातः - .... रात्रौ - अङ्कुरार्पणम्
२३-०५-२०२६ मन्दवासरः
प्रातः - ध्वजारोहणम्, रात्रौ - महाशेषवाहनम्
२४-०५-२०२६ भानुवासरः
प्रातः - लघुशेषवाहनम्, रात्रौ - हंसवाहनम्
२५-०५-२०२६ इन्दुवासरः
प्रातः - सिंहवाहनम्, रात्रौ - मौक्तिकमण्टपम्
२६-०५-२०२६ भौम्यवासरः
प्रातः - कल्पवृक्षवाहनम्, रात्रौ - सर्वभूपालवाहनम्
२७-०५-२०२६ सौम्यवासरः
प्रातः - आन्दोलिकायां मोहिन्यवतारः, रात्रौ - गरुडवाहनम्
२८-०५-२०२६ बृहस्पतिवासरः
प्रातः - हनुमद्वाहनम्, सायं वसंतोत्सवः, रात्रौ - गजवाहनम्
२९-०५-२०२६ भृगुवासरः
प्रातः - सूर्यप्रभवाहनम्, रात्रौ - चन्द्रप्रभवाहनम्
३०-०५-२०२६ मन्दवासरः
प्रातः रथोत्सवः, रात्रौ - अश्ववाहनम्
३१-०५-२०२६, भानुवासरः
प्रातः - चक्रस्नानम्, रात्रौ - ध्वजावरोहणम्

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-03-2026 & posting at Tirupati RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.

